North Asian International Research Journal of Multidisciplinary

IRJIF IMPACT FACTOR:6.019

ISSN: 2454-2326 Vol.9, Issue-9 September-2023

Index Copernicus Value: 58.12 Thomson Reuters ID: S-8304-2016

# पञ्चलहरी काव्यानां स्वरूपाविष्कारः

Name : Gandikota Chennaiah
Department : Sahitya
Class : PH.D
University : National sanskrit university
Email : chennaiahabvp@gmail.com
Cell No : 9398403883

## पञ्चलहरी काव्यानां विषय परिचयः

संस्कृतसाहित्यशास्त्रे प्रसिद्धम् कव्यम् पञ्चलहरी इति पण्डितैः बहुधा प्रशंस्यते। पण्डितराजजगन्नाथेन बहवः ग्रन्थाः लिखिताः तेषु लहरी विशिष्टाः केचन विद्यन्ते ।

लहरी इत्युक्तौ तरङ्गाः। भक्तिभावतरङ्गरूपतया प्रणीतानि स्तोत्रकाव्यादीनि लहरी इति नाम्ना व्यवह्रीयन्ते । अर्थात् इष्टदेवतानां स्तुतिरूपकस्तवनं तेषां गुणविभाव स्वरूपादीनां वर्णनं च इह लहरी काव्येषु प्राप्यते। पण्डितराजजगन्नाथोऽपि इष्टदेवतास्तवनरूपेण पञ्चलहरीकाव्यानि चकार । एतत्प्रणीतानि लहरी काव्यानि सारस्वतदृशा भवत्यभिनिवेशदृशा च विशेषख्यापिनीयतां भजन्ते ।

गङ्गालहरी अथवा पीयूषलहरी, अमृतलहरी अथवा यमुनालहरी च करुणालहरी, लक्ष्मीलहरी, सुधालहरी इति लघु पञ्चकाव्यानि पण्डितराजजगन्नाथ कृतपञ्चलहरी काव्यानि वर्तन्ते । तस्य समेषु लहरीकाव्येषु आहत्य १९० श्लोकाः सन्ति – गङ्गालह ५३, अमृतलहर्यां ११ करुणा लहर्यां ५५, लक्ष्मीलहर्यां ४१, सुधालहर्यां ३० ।

अस्मिन् गङ्गालहरी त्रिपञ्चाशत् पद्यैः पवित्रगङ्गानदी संस्तुता। पीयूषलहरी इति नामान्तरं चास्ति । तत्र गङ्गालहरी काव्ये पण्डितराजजगन्नाथः गङ्गानदी संस्तुता । पीयूषलहरी इति नामान्तरं चास्ति । तत्र गङ्गालहरी काव्ये पण्डितराजगन्नाथः पवित्रगङ्गानदि जलस्य पवित्रता विषये गङ्गाजलस्तुति विषये समग्रतया विवृतवान्।

भारतीयप्रजाः ( जनाः) प्रगाढ विश्वासः भवति, यदि पवित्र गङ्गानद्यां एकवारमपि स्नानं करोतीति चेत् तेषां पापाः नाशनं भविष्यति । मरणनन्तरम् तेषां अवश्यमेव स्वर्गं गमिष्यति इति प्रगाढ विश्वासः भवति। गङ्गासमानानदीतीर्थः अस्मिन् भूमण्डले नास्ति, न भविष्यति इति पण्डितराजजगन्नाथस्य विश्वासः भवति । गङ्गानद्यां निष्कामभावया श्रद्धापूर्वकेन स्नानम् आचरतिचेत् तेषां अवश्यमेव मोक्षम् प्राप्नोति इति अस्य अभिप्रायः विश्वासः भवति। एतत् गङ्गाजलमहिमाविषये सप्तमश्लोके गङ्गास्नाने पवित्रताप्रसङ्गे कविः एवं रूपेण कथयति-

**प्रभाते स्नान्तीनां नृपतिरमणीनां कुचतटी**

**गतो यावन्मातैर्मिलति तव तोयाग्ममदः ।**

**मृगास्तावद्‌ वैमामिकशतसहस्त्रैः परिवृता**

**विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम्।।**

**( गङ्गालहरी ७ श्लोकः )**

# पञ्चलहरी काव्यानां स्वरूपाविष्कारः

अस्मिन् श्लोके महाकविपण्डितराजजगन्नाथः गङ्गास्नानपवित्रताविषये एवं रूपेण वदति, यथा हे माता गङ्गा। प्रातः कालसमये सूर्योदयेन स्नानार्थं राजस्त्रीणां भवत्याः गङ्गानदीसमीपे आगत्य स्नानं कुर्वतीनां एतद् समये नृपतिरमणीनां कुचयोः सम्पर्कं कस्तूरी यदा गङ्गाजलं स्पृशति तावदेव सा त्वरितमेव कस्तूरी मृगस्य सुन्दरं रूपं धारयित्वा देवदूतशतसहस्रैः अपरिमितिवैमानिकैः परिवृता स्वर्गस्थं नन्दनवनं प्रविशति । तत् कारणात् कस्तूरीजलसम्पार्कात् पशवोऽपि स्वशरीराणां स्वर्गं प्राप्नोति । परन्तु मनुष्याणां का कथा इति कवेरभिप्रायः ।

पण्डितराजजगन्नाथस्य पूर्वं अपि गङ्गानदिविषये गङ्गानदीजलस्नानपवित्रताविषये अद्वैत सन्यासिः आदिशंकराचार्यः अपि प्रशंसति। अद्वैत आदि शङ्काराचार्यः एतत् विषये एवं रूपेण कथयति ।

हे स्वर्गवासि मातर्गङ्गा । भवत्याः संपूर्णस्थितिविषये वेदाः अपि वक्तुं न शक्नोति। भवत्याः स्थितिः केवलं बुध्या पदेन एव अवगमनं शक्यते । भवत्याः स्वच्छनर्मिलजलम् एकमेव अज्ञानम् नाशयति इति गङ्गाजल पवित्रताविषये अद्वैत आदिशङ्काराचार्यः प्रशंसितवान्।

**अमृतलहरी**

अमृतलहरी इति पण्डितराजजगन्नाथकृत एकम् लघुकाव्यम्। तत्र अमृतलहरी एकादशपद्यात्मिका यमुनास्तुतिः। अमृतलहरी काव्ये ११ श्लोकेन पण्डितराजजगन्नाथः यमुनानदीवैशिष्ट्यम्, यमुनानदीस्तुति विषये सहजमनोज्ञरमणीयतया विवरणं कृतवान्। हे माता यमुना भवत्याः भक्तः स्नानसमये स्नानार्थं भवत्याः जलम् स्वीकरोती चेत्, तेषां अवश्यमेव प्राप्नोति समीकरणस्य अनन्यति हरिहरयोः रूपम्।

एतद् विषयमेव पण्डितराजजगन्नाथः श्लोकरूपेण कथयति।–

**अन्तमौक्तिकपुञ्जमञ्चिम बहिः स्निग्धेन्द्रनीलप्रभं**<br>
**मातर्मे मुदमातनोतु करुणावत्या भवत्याः पयः ।**<br>
**यद्रूपद्वयधारणादिव नृणआमाचूडमामज्जतां**<br>
**तत्कालं तनुतेतरां हरिहराकारामुदरां तनुम्।।**<br>
**( अमृतलहरी श्लोकः ४३ )**

हे करुणाशालिनी माता यमुना भवत्याः नदीजलम् अन्ते मौक्तिकपुञ्जस्य मञ्चिमा सौन्दर्ये , बहिः स्निग्धमनोहर इन्द्रनीलमणिः रूपेण विराजन्ते। माता कृपया तद् जलम् मम उपरि आनन्दवर्षरूपेण आमस्तकम् स्पृशति, तत् एव मम कृते आनन्दम् दीयति। भवत्याः मौक्तिकपुञ्जस्य मञ्चिमा, इन्द्रनीलमणिः द्वयोः हरहर्योः

# पञ्चलहरी काव्यानां स्वरूपाविष्कारः

सद्दशेन विराजमानेन भवति। भवत्यानदीजले यः कोऽपि ( देहेन) शरीरेण स्पृशति चेत् तेषां तनुं हरिहराकारा रूपेण विराजिष्यति ।

स्थिति अनुचरः अद्वैतसिद्धान्तकर्ता जगद्गुरु आदिशङ्कराचार्यः महाकवि पण्डितराजजगन्नाथः अपि देवदेवीनां भक्तिभावविषये उभौ समानः भवति। परन्तु किञ्चिद् निशितेन पश्यति चेत् पण्डितराजजगन्नाथः शिव अपेक्षया भगवान् विष्णुः उपरि अधिकतया भक्तिभावः भवति। सर्वैः पण्डितैः विश्वासः भवति श्रीमहाविष्णोः भक्ति विषये, प्रसिद्ध विष्णुभक्तः वल्लभाचार्यः पण्डितराजजगन्नाथस्य पितृतुल्यः च मातृकः इति विश्वसन्ति। पण्डितराजजगन्नाथः परमविष्णुभक्तः परन्तु आदिशङ्कराचार्यस्य अद्वैतविषये तेषां विश्वासः भवति।

## करुणालहरी

करुणालहरी पञ्चपञ्चाशत् पद्यैः भगवान् ( विष्णुः) कृष्णुस्य स्तुतिः। अत्र करुणालहर्यां पण्डितराजजगन्नाथः श्रीकृष्णस्य वैशिष्ठ्यम् सहजमनोहरतया विवरणं कृत्वा , तेषां दुःखविषयम् अपि सम्यक्तया प्रकटितवान्। एकम् श्लोके महाकवि पण्डितराजजगन्नाथः शिशुव रूपेण एवं वदति – हे भगवान् मम रक्षणं करोत् इति।

**यथा**

**नितरां विनयेन पृच्छते सुविचार्योत्तरमत्र यच्छ मे ।**

**करितो गरितोप्यहं गुसवरितो नोद्धरसे यदद्य माम् ।।**

**( करुणालहरी श्लोकः १५ )**

अस्मिन् श्लोके कविः वदति हे भगवान्। अहं अत्यन्त विनयेन पृच्छति, भवान् सम्यक् रूपेण चिन्तयित्वा उत्तरम् ददातु। अहं गजात्, पर्वतात् अधिक स्थूलः किम् ? भवान् मां विरतं शीघ्रं न उद्धरसे इति ।

## लक्ष्मीलहरी

लक्ष्मीलहरी काव्यम् एकचत्वारिंशत् संख्याकैः पद्यैः लक्ष्मी स्तुतिः। लक्ष्मीलहर्याः अन्तः प्रवेशमात्रेण भक्तितत्वं साहित्यतत्वं समाजतत्वं च पाठकानां मनः हरति। पण्डितराजजगन्नाथः लक्ष्म्याः करुणाप्राप्त्यर्थं श्रीमहाविष्णुपत्न्याः वन्दनं लक्ष्मीलहरीकाव्ये विदधाति। पण्डितराजजगन्नाथः दारिद्यनाशनात् लक्ष्मीलहरी काव्यम् रचितवान्। पण्डितराजजगन्नाथः धनदारिद्येन पीडितः आसीत्। तदार्थमेव अर्थप्राप्त्यर्थं सकलऐश्वर्यस्याधीष्ठात्र्याः लक्ष्म्याः पदवन्दनं करोति । तत्र पण्डितराजजगन्नाथः कथयति महालक्ष्मी मन्त्रं पुनः पुनः जपम् करोति चेत्, सा लक्ष्मी प्रसन्ना भवति। तेन कारणेन गृहं धनधान्यैः पूरयतीति । तत् विषयं लक्ष्मीलहरी दशमश्लोके कविः एवं कथयति यथा-

## पञ्चलहरी काव्यानां स्वरूपाविष्कार:

**शरौ मयाबीजौ हिमकरकलाक्रान्तशिरसौ**
**विधायोर्ध्वं बिन्दुं स्फुरतमिति बीजं जलधिजे।**
**जपेद्यः स्वच्छन्दं स हि पुनरमन्दं गजघटा**
**मदभ्राम्यद् भृङ्गैर्मुखरयति वेशमानि विदुषाम् ।।**
**( लक्ष्मी लहरी श्लोक: १० )**

पण्डितराजजगन्नाथः लक्ष्मी लहरी बाल्यकाले एवं लिखितवान्। तत् कारणेन लक्ष्मीलहर्यां चत्वारिंशतमे श्लोके बालशब्दस्य प्रयोगं कृतवान्। तत् श्लोके एवं कथयति-

**अये मातर्लक्ष्मीवदरुणपदाम्भोजनिकटे**
**लुठन्तं बालं मामविरलगलद्बाष्पजटिलम्।**
**सुधासेकास्निग्धैरतिमृसणमुग्धैः करतलै:**
**स्पृशन्ती मा रोदीरिति वद समाश्वास्यपि कदा।**
**( लक्ष्मी लहरी श्लोक: ४० )**

अस्मिन् श्लोक बालशब्दस्य प्रयोगेन भावितुं शक्यते, इयं लहरी जगन्नाथस्य बाल्यकाले विरचिता इति।

पण्डितराजजगन्नाथेन लक्ष्मीलहर्यां एकचत्वारिंशत्तमे श्लोके लक्ष्मीदेवि लोकमातरं भवति, तत् कारणेन लोकमातरं लक्ष्मीं सर्वे स्वमातरमिव भावयन्ति इति कथयति।

**रमे पद्मे लक्ष्मी प्रणतजनकल्पद्रुमलते**
**सुधाम्बोधे : पुत्रि त्रिदशनिकरोपास्तचरणे।**
**परे नित्यं मातुर्गुणमयि परं ब्रह्ममहिले**
**जगन्नाथस्याकर्णय मृदुलवर्णावलिमिमाम्।।**
**( लक्ष्मी लहरी श्लोक: ४१ )**

# पञ्चलहरी काव्यानां स्वरूपाविष्कारः

पण्डितराजजगन्नाथः अस्मिन् श्लोके लक्ष्मीदेवि वैशिठ्यम् विवृतवान्। सकलकल्याणप्रदायिनीं रमणी लोकमातरं लक्ष्मीं सर्वे स्वमातरमिव भावयन्ति। किन्तु पण्डितराजजगन्नाथेन सः स्वपाण्डित्यं प्रदर्शितवा लोके सर्वापेक्ष्या विशेषेण तादात्म्यभावेन च लोकमाता स्वमातेव सम्भाविता इति उक्तवान्। यतो हि जगन्नाथ स्वमातुः नामम् अपि लक्ष्मीरेव। अतः जगन्नाथः लक्ष्मीलहर्यां सर्वदा लक्ष्मीमातरं स्वामातृभावनयैव प्रार्थितवान्।

## सुधालहरी

सुधालहरी त्रिंशत्पद्यैः सकलकर्मसाक्षिणः भगवतः सूर्यस्य स्तुतिः। संस्कृतवाङ्मये सूर्यस्तुतिपरास्सन्निवेशाः प्रत्यक्षीभवन्ति। सुधालहरीपदस्य अमृततरङ्ग इत्यर्थः। जगन्नाथःकवितासुधाम्बुधेः तरङ्गरूपेवेयं सुधालहरी इति अस्याः नामसार्थकम्। सुधालहर्याः नामान्तरं सूर्यलहरी इति कविना विहितम्। सुधालहर्यां पण्डितराजजगन्नाथः विविधरूपेण सूर्यं स्तौति । क्षेमं तन्वन्तु ता वः शिवमयवपुषो वासरेशस्य गावः। इत्येवं कविः पाण्डितराजजगन्नाथः सूर्यं सुधालहर्यां स्तौति। सुधालहर्यां पण्डितराजजगन्नाथ सकलकर्मसाक्षिणः प्रत्यक्षदेवः सूर्यस्य परोपकारपरायणत्वं कारुणिकत्वं विजयप्रदायकत्वं च परिकीर्तितमस्ति।

उदितसूर्यस्य सौन्दर्यवर्णनेनैव सुधालहर्याः आरम्भे वर्तते।

सुधालहर्यां प्रतिश्लोकः प्रतिपदं प्रत्यक्षरं च जगन्नाथनिष्ठः सूर्यविषयको रतिभावः एवाभिव्यज्यत इति काव्येऽत्र रतिभावध्विरङ्गी गुणालङ्कारादस्सर्वे तदङ्गभूताः भवन्तीति अनुमातुं शक्यते ।

पण्डितराजजगन्नाथः सुधालहर्यां प्रथमे श्लोके सूर्यं लोकानुभवानुगुणं तेजोराशिं सम्भावयामास। चरमे श्लोके तु सूर्यं सर्वान्तर्यामिनं वेदोपनिषत् प्रतिपादनारायणस्वरूपं पापातीतं शिवङ्करं च सन्दर्शं। पण्डितराजजगन्नाथः सुधालहरी उल्लासः फुलपङ्केरुहः इत्यादिश्लोखेनारभ्य ऊध्वं पापावलिभ्यः इत्यादिश्लोकेनासमापयत्। उकारादिना उल्लासशब्देनारभ्य सुधालहरीं पण्डितराजजगन्नाथः ऊध्वमित्यादिश्लोकेन ऊकारदिना समाप्तिमकरोत् मध्ये विद्यमानेषु श्लोकेषु सूर्यस्य लोकप्रियं भावुकाः विविधाः गुणाः हृदयङ्गमं वर्णितास्सन्ति।